योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ३०

त्रिंशः सर्गः ३०

श्रीवसिष्ठ उवाच ।

अथेमं परमं राम विज्ञानाभिगमे क्रमम् ।

श्रृणु दैत्येश्वरः सिद्धः प्रह्लादः स्वात्मना यथा ।। १

आसीत्पातालकुहरे विद्रावितसुरासुरः ।

हिरण्यकशिपुर्नाम नारायणपराक्रमः ।। २

आक्रान्तभुवनाभोगः स जहार हरेर्जगत् ।

षट्पदस्य बृहत्पत्रं राजहंस इवाम्बुजम् ।। ३

चकार जगतां राज्यं समाक्रान्तसुरासरः ।

दन्ती निरस्तहंसौघो नलिन्यामलिनामिव ।। ४

अथासावसुराधीशः कुर्वंस्त्रिभुवनेशताम् ।

कालेन सुषुवे पुत्रानङ्कुरानिव माधवः ।। ५

तेऽवर्धन्ताचिरेणैव तेजस्यूर्जितबालकाः ।

दशार्कांशुशतानीव व्योमाक्रान्तिविलासिनः ।। ५

प्रह्लादनामा बलवान्प्रधानात्मा बभूव ह ।

तेषां मध्ये महार्हाणां मणीनामिव कौस्तुभः ।। ७

तेनाराजत पुत्रेण हिरण्यकशिपुर्भृशम् ।

सर्वसौन्दर्ययुक्तेन वसन्तेनेव वत्सरः ।। ८

अथ पुत्रसहायोऽसौ बलकोशसमन्वितः ।

आजगाम मदं दैत्यस्त्रिगण्डगलितेभवत् ।। ९

तत्तापाक्रान्तितापेन त्रिजगन्ति विकासिना ।

कल्पान्तसूर्यगणवन्नवयैव करश्रिया ।। १०

अखिद्यन्तास्य तेनाथ सूर्येन्दुप्रमुखाः सुराः ।

दुर्विलासविलोलस्य बालस्येव स्वबन्धवः ।। ११

प्रार्थयांचक्रिरेऽथाजं दैत्येन्द्रेभपतेर्वधे ।

न क्षमन्ते महान्तोपि पौनःपुन्येन दुष्क्रियाम् ।। १२

ततः प्रलयपर्यस्तजगद्धर्घरजृम्भितम् ।

दिग्दन्तिदशनप्रख्यनखवज्रादिजृम्भितम् ।। १३

स्थिरविद्युल्लताजालभासुरद्विजमण्डलम् ।

दशदिक्कोटरोद्भ्रान्तज्वलज्ज्वलनकुण्डलम् ।। १४

समस्तकुलशैलेन्द्रपिण्डपीठोद्भटोदरम् ।

दोर्द्रुमाधूतनिर्धूतस्फुरद्ब्रह्माण्डखर्परम् ।। १५

वदनोदरनिष्क्रान्तवातोत्सारितपर्वतम् ।

त्रिजगद्दहनोद्युक्तकोपकल्पाग्निगर्वितम् ।। १६

सटाविकटपीनांसस्पन्दप्रेरितभास्करम् ।

रोमकूपलसद्वह्निपुञ्जापिञ्जरपर्वतम् ।। १७

कुलाचलमहाकुड्यघटनोद्भटदिक्तटम् ।

सर्वावयवनिष्क्रान्तपट्टिशप्रासतोमरम् ।। १८

नारसिंहं वपुः कृत्वा माधवोऽहन्महासुरम् ।

लसत्कटकटारावं तुरङ्गममिव द्विपः ।। १९

पौरमासुरमुद्भ्रान्तैददाहेक्षणवह्निभिः ।

स सर्वभूतकल्पान्ते जगज्जालमिवानलः ।। २०

नृसिंहमारुते तस्मिन्भृशं क्षोभमुपागते ।।

विस्फूर्जितघनास्फोटैरेकार्णव इवाकुले ।। २१

दुद्रुवुर्दानवौघास्ते दिग्ज्वलन्मशका इव ।

उपाययुरदृश्यत्वं दीपा इव गतत्विषः ।। २२

अथ विद्रुतदैत्येन्द्रं दग्धान्तःपुरमण्डलम् ।

बभूव पातालतलं कल्पक्षुण्णजगत्समम् ।। २३

अकालकल्पान्तविधौ हत्वा दैत्यं शनैर्विभौ ।

क्वापि याते समाश्वस्तसुरसंरम्भपूजिते ।। २४

मृतशिष्टा दनुसुताः प्रह्लादपरिपालिताः ।

दग्धं तं देशमाजग्मुः सरः शुष्कमिवाण्डजाः ।। २५

तत्र कालोचितां कृत्वा स्वनाशपरिदेवनाम् ।

और्ध्वदेहिकसत्कारं चक्रुः प्रेतेषु बन्धुषु ।। २६

हतबन्धुजनं प्लुष्टबन्धुबान्धवमण्डलम् ।

शनैराश्वासयामासुर्मृतशिष्टं स्वकं जनम् ।। २७

चित्रार्पितोपमदुराकृतयो निरीहा

दीनाशया हि महताम्बुरुहोपमानाः ।

शोकोपतप्तमनसोऽसुरनायकास्ते

दग्धद्रुमा इव निरस्तविकारमासन् ।। २८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मो० उपशमप्रकरणे प्रह्लादविश्रान्तौ हिरण्यकशिपुवधो नाम त्रिंशः सर्गः ।। ३० ।।